| अथ प्रकीर्णकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | अकामतस्तदर्द्धं अर्थान्नक्तव्रतम्। | ० | ।० पणाः। | यथाशक्ति। |
| | रजस्वलाया ब्राह्मण्याः शेषवर्णरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः स्पर्शे षड्रात्रोपवासः। एतच्च कामतः। अकामतस्तदर्द्धम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | रजस्वलायाः शूद्रायाः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | सवर्णयो रजस्वलयोरन्योन्यस्पर्शे एकोपवासः पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | अत्यन्ताधमरजक्यादिरजस्वलास्पर्शे द्व्यहसाध्यं ब्रह्मकूर्च्चव्रतम्। | ० | १ कार्षापणलभ्यकाञ्चनम्। | यथाशक्ति। |
| | एतच्च कामतः। | | | |
| | अकामतस्तदर्द्धम्। | | | |
| | एतत् सर्व्वं शुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्य्यम्। | | | |
| अथ रजस्वलायाः पतितचाण्डालादिस्पर्शः। आदिना अन्त्यजवायसयोर्ग्रहणम्। | प्रथमेऽह्नि स्पर्शे त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | द्वितीयेऽह्नि द्व्यहोपवासः। | ० | १ कार्षापणः। | यथाशक्ति। |
| | तृतीयेऽह्नि अहोरात्रोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्व्वं स्पर्शे नक्तम्। | ० | १ रौप्यमाषकम्। | यथाशक्ति। |
| | एतच्चाकामतः। | | | |
| | कामतः स्पर्शे सर्व्वत्र त्रिरात्रोपवासः। तदन्ते अजाघ्राता कारयितव्या च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| अथ रजस्वलाया उच्छिष्टशूद्राश्वशूकरादिस्पर्शः। आदिना जम्बूकखरग्राम्यकुक्कुटानां ग्रहणम्। | प्रथमद्वितीयदिनयोरुच्छिष्टशूद्रास्पर्शे द्व्यहोपवासः। | ० | १ कार्षापणः। | यथाशक्ति। |
| | तृतीयदिने स्पर्शे एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | चतुर्थदिने स्पर्शे नक्तम्। | ० | २ रजतमाषकौ। | यथाशक्ति। |
| | कुक्कुटादिस्पर्शे सर्व्वत्र नक्तमेव। | ० | २ रजतमाषकौ। | यथाशक्ति। |
| | एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्त्तव्यम्। | | | |
| | एकवृक्षादौ रजस्वलायाश्चाण्डालस्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | रजस्वलाया उच्छिष्टचाण्डालादिस्पर्शे द्विजस्त्रीणां प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | शूद्राया धेनुदानम्। | | | |
| | एषु प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः। अत्रापवादः। "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च स्पृष्टास्पृष्टि न दूष्यति॥" | | | |
| अथ चाण्डालादिसङ्करः। आदिना श्वपाकपुक्कसयोर्ग्रहणम्। | संवत्सरैकचाण्डालसङ्करे मासैकं गोमूत्रयावकाहारः। एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम्। | १२ धेनवः। | ३६ कार्षापणाः। | १०० गावः। अशक्तौ १०० कार्षापणाः। अभावे सर्व्वस्वम्। |
| | बालवृद्धस्त्रीशूद्राणामर्द्धम्। आषोड़शाद्बालाः। सप्तत्यूर्द्धं स्थविराः। | ६ धेनवः। | १८ कार्षापणाः। | ५० गावः। अशक्तौ ५० कार्षापणाः। अभावे सर्व्वस्वार्द्धम्। |
| | चौर्य्ये प्रायश्चित्ते ब्राह्मणभोजनम्। | | | |
| | एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव। | | | |